अत्राह। ननु अर्थेन्द्रियसम्प्रयोगाद् विज्ञानं प्रत्यक्षमित्येतावदेवास्तु लक्षणं व्यभिचाराभावात्। तथा हि– अर्थेन्द्रियसम्प्रयोगाद्विज्ञानं प्रत्यक्षं; न च रजतभ्रमो विज्ञानम्, अपि त्वज्ञानम्। उक्तं हि "अविद्या वेद्यैः सह भ्रम"[1] इति। तस्मादनर्थकं सम्प्रयुक्तेऽर्थे इति विशेषणम्। नैतत् सारम्– एवमप्यर्थेन्द्रियसम्प्रयोगाल्लिङ्गात् तत्कारणानुमानं विज्ञानं प्रत्यक्षमुक्तं मा भूदिति अर्थवदेव सम्प्रयुक्तेऽर्थ इति विशेषणम्। अतो यथान्यासमेवास्तु लक्षणम् अर्थेन्द्रियसम्प्रयोगात् सम्प्रयुक्तेऽर्थे विज्ञानं प्रत्यक्षम् इति। नन्वेवमपि सम्प्रयुक्तेऽर्थ इति विशेषणमनर्थकमेव; कथम्? अर्थेन्द्रियसम्प्रयोगाल्लिङ्गात्[2] यदनुमानज्ञानं, न तदर्थेन्द्रियसम्प्रयोगाज्जातम्। किं तर्हि? लिङ्गात् तत्। अतोऽर्थेन्द्रियसम्प्रयोगाज्ज्ञानं प्रत्यक्षमित्युक्तेऽन्यत्र प्रसङ्गाभावात् सम्प्रयुक्तेऽर्थे इति विशेषणमनर्थकमेव। सत्यं; तथापि शुक्तिकारजतभ्रान्तिः शुक्तिकेन्द्रियसम्प्रयोगादुत्पन्ना;[3] ज्ञानं च तदापाततो ज्ञानमित्यनु-

---

1 B भ्रमाः.

2 A लिङ्गाद्यनुमान.

3 A – दुत्पन्नज्ञानं च; D – दुत्पन्न ज्ञानं.

भूयमानत्वात्। अतः तद्व्यवच्छेदार्थमर्थवदेव सम्प्रयुक्तेऽर्थ इति विशेषणम्।

कः [1]पुनरर्थेन्द्रियसम्प्रयोगो नाम? तत्र केचित्तावदाहुः—षोढा सम्बन्धः सम्प्रयोगः[2]। तथाहि—चक्षुस्पर्शनसंयोगात् द्रव्यग्रहणम्; संयुक्तसमवायात् ताभ्यां गुणग्रहणं; संयुक्तसमवेतसमवायात् गुणगतसामान्यग्रहणं; श्रोत्रसमवायात् शब्दग्रहणम्। तथाहि[3]—भेरीदण्डसंयोगात् निमित्तकारणात् भेर्याकाशसंयोगादसमवायिकारणात्, क्वचिद्वंशदलविभागात् निमित्तकारणाद् वंशदलाकाशविभागाद् असमवायिकारणात् महात्याकाशप्रदेशे समवायिकारणे सर्वत्र तावदाद्यः शब्द उत्पद्यते। तस्माच्च शब्दादसमवायिकारणाद् अदृष्टादिनिमित्तकारणसहितात् आद्यशब्दाश्रयाकाशप्रदेशानन्तराकाशप्रदेशेषु समवायिकारणेषु सर्वतोदि[ताः? शाः][4] शब्दा उत्पद्यन्ते, तेभ्यश्चान्ये, तेभ्यश्चान्ये, इति वीचीसन्तानवत् शब्दसन्तानः; ततश्च कर्णशष्कुल्यवच्छिन्ने नभोदेशे श्रोत्रशब्दवाच्ये शब्द उत्पद्यते। स च श्रोत्रसमवायात् श्रोत्रेण गृह्यत इत्यौलूक्यं दर्शनम्। तत्र च संयोगविभागशब्दानां शब्दारम्भे कार्यैककार्थसमवायलक्षणा तन्तुसंयोगस्य [5][प्रागा? पटा]रम्भ इव, आत्मनन:संयोगस्य बुद्ध्याद्यात्मविशेषगुणारम्भ इव च लघ्वी प्रत्यासत्तिः। तथा हि—भेर्याकाशसंयोगवंशदलाकाशविभागः कारणभूतशब्दाश्चाकाशे वर्तन्ते,

1 C पुनरयं.
2 D omits सम्प्रयोगः.
3 A C omit हि.
4 Suggestion in D.
5 Suggestion in D.

कार्यशब्दोऽप्याकाशे वर्तत इति कार्यैकार्थसमवायलक्षणैवात्र लघ्वी प्रत्यासत्तिरसमवायिकारणस्य; न पुनस्तन्तुरूपाणां पटरूपोत्पत्ताविव कार्यकारणैकार्थसमवायलक्षणा बृहती; तद्वदिह व्यवधानाभावात्। तथा हि–तन्तुरूपाणि तन्तुषु वर्तन्ते; कार्यस्य पटगतरूपस्य समवायिकारणभूतः पटोऽपि तन्तुषु वर्तते; कार्यमपि पटरूपं पटे वर्तते इत्यस्ति तत्र व्यवधानम्। नैवमिह, कार्यकारणयोरेकत्र वृत्तिदर्शनात्। तस्मात् स्वात्मनि कार्यारम्भकत्वाद्यथाकाशं समवायिकारणम्, एवं प्रत्यासन्नत्वे सति कार्यजनकत्वात् भेर्याकाशसंयोगादीनाम् असमवायिकारणत्वं, समवाय्यसमवायिकारणलक्षणरहितत्वे सति कारणत्वात् भेरीदण्डसंयोगादीनां निमित्तकारणत्वमिति कारणत्रयात् शब्दोत्पत्तिः। स च श्रोत्रसमवायात् श्रोत्रेण गृह्यत इत्यलं प्रसङ्गेन॥

समवेतसमवायात् गुणगतसामान्यग्रहणं शब्दत्वादिसामान्यग्रहणम्। उक्तसम्बन्धसम्बन्धिविशेषणविशेष्यभावादभावसमवायग्रहणम्। तद्यथा [1]संयुक्तविशेषणत्वाद् अभावग्रहणम् अफलवती शाखेति; संयुक्तविशेष्यत्वादिह शाखायां फलाभाव इति; संयुक्तसमवेतविशेषणत्वात् पटगतशौक्ल्यं रूपशून्यमिति; संयुक्तसमवेतविशेष्यत्वादिह शौक्ल्ये रूपाभाव इति; संयुक्तसमवेतसमवेतविशेषणत्वात् गुणगतसामान्यं सामान्यशून्यमिति; संयुक्तसमवेतसमवेतविशेष्य[2]-

1 D omits संयुक्त-शाखेति and suggests तत्राभावस्य यथा संयुक्तविशेषणत्वाद् इयं शाखा फलशून्येति.

2 C विशेषणत्वात्.

त्वादिह गुणगतसामान्ये सामान्यान्तराभाव इति; समवेत-विशेषणत्वाद् गुणशून्योऽयं शब्द इति; समवेतविशेष्यत्वादिह शब्दे गुणान्तराभाव इति। समवेतसमवेतविशेषणत्वात् [1]शब्दत्वादिसामान्यं सामान्यान्तरशून्यमिति। समवेत-समवेतविशेष्यत्वादिह शब्दत्वादिसामान्ये सामान्यान्तराभाव इति। समवायस्य तु क्वचिदेव, अत्र पटे रूपसमवाय इति संयुक्तविशेष्यत्वात् समवायग्रहणस्य उदाहरणमेतत्। संयुक्त-विशेषणत्वात् रूपसमवायवानयं पट इति; संयुक्तसमवेत-विशेष्यत्वादिह गुणे जातिसमवाय इति। संयुक्तसमवेतविशे-षणत्वात् जातिसमवायवानयं गुण इति। संयुक्तसमवेतसमवेते गुणगतजातिविशेषे वस्त्वन्तरसमवायाभावाद् इतःपरमुदा-हरणमत्र चक्षुःस्पर्शनादीन्द्रियसम्बन्धे समवायस्य नास्ति। समवेतविशेष्यत्वादिह शब्दे शब्दतादिजातिसमवाय इति। समवेतविशेषणत्वात् शब्दत्वादिजातिसमवायवानयं शब्द इति। समवेतसमवेते शब्दत्वादिसामान्ये वस्त्वन्तरसमवाय-स्याभावात् समवेतसमवेतविशेषणविशेष्यत्वनिबन्धनं सम-वायग्रहणं नास्ति। तस्मादितःपरमिहापि श्रोत्रेन्द्रियसम्बन्ध-योग[2] उदाहर्तुमशक्यम्। अतः समवायस्य क्वचिदेवोदा-हरणं, नाभावस्येव पञ्चस्वपि सम्बन्धेष्विति सिद्धम् इति। तदसत्, अत्र प्रमाणाभावात्। कार्यमेव प्रमाणमिति चेत्, न। योग्यतालक्षणसम्बन्धादपि कार्योपपत्तेः। तथाहि इदमि-न्द्रियमस्यार्थस्य योग्यम्। अयं [3]वार्थोऽस्य चक्षुरादेरिन्द्रियस्य

[1] A B C omit शब्दत्वादि-सामान्यम्.
[2] D suggests युग्मं.
[3] A पदार्थोऽस्य.

योग्य इत्यनयोरस्ति परस्परं योग्यतालक्षणः सम्बन्धः। स एव कार्यं रूपादिविज्ञानमुपपादयिष्यति। तस्मादेतदुपपन्नं भविष्यतीति किमनया षड्विधसम्बन्धकल्पनया [1]कल्पशून्यया। अभावसमवाययोस्तु कार्यमेवासिद्धं समवायानभ्युपगमात्। अभावस्य षष्ठप्रमाणगोचरत्वस्य [2]वक्ष्यमाणत्वात्। तस्माद्योग्यतालक्षण एवार्थेन्द्रियसम्प्रयोगः॥

अपरं प्रत्यक्षलक्षणम्–स्वार्थजन्यं प्रमासाधनं प्रत्यक्षम्। प्रमासाधनं प्रत्यक्षमित्युक्ते अनुमानादेरपि प्रत्यक्षत्वप्रसङ्ग इति स्वार्थजन्यग्रहणम्। अनुमानादीनां स्वार्थजन्यत्वं नास्तीति वेदान्तस्थितिः। स्वार्थजन्यं प्रत्यक्षमित्युक्तेऽपि प्रत्यक्षफलेन व्यभिचार इति तन्निराकरणार्थं प्रमासाधनग्रहणम्॥

तद्द्विविधं– निर्विकल्पकं सविकल्पकं च। तत्र प्रथमाक्षसन्निपातजं वस्तुमात्रग्रहणं निर्विकल्पकम्। यथा भेदविकल्पनाप्रागवस्थं भेदप्रतिभासशून्यं वस्तुमात्रज्ञानम्। भिन्नवस्तुज्ञानं सविकल्पकम्। विकल्पो भेदः। सह विकल्पेन वर्तत इति सविकल्पकम्। यथा धर्मिप्रतियोगिग्रहणपूर्वकम् अर्थेन्द्रियसम्प्रयोगात् पृथिव्यादिभिन्नवस्तुज्ञानम्। अन्ये पुनराहुः—विकल्पः शब्दः; तेन सह वर्तत इति सविकल्पकं शब्दोल्लिखितं विज्ञानम्, शब्दोल्लेखविकलं तु निर्विकल्पकमिति। तदसत्; बालादिविज्ञानस्यापि अस्मदादिविज्ञानवच्छब्दोल्लेखानुमानात्। बालमूकादीनामपि हि पूर्वजन्मानु-

---

1 B D कल्पकशून्यया. 2 A B लक्ष्यमाणत्वात्.

भूतशब्दसंस्कारात् शब्दस्मरणे सति इदं तदिति केनचिच्छब्देनोल्लिखितं विज्ञानम्। अन्यथा, स्तनादिष्वन्यपरिहारेण प्रवृत्त्यसम्भवात्॥

अपरं द्वैविध्यम्—योगिप्रत्यक्षम् अयोगिप्रत्यक्षं चेति। तत्र योगिप्रत्यक्षं नाम पुरुषान्तरप्रत्ययान्तर[1]निरपेक्षस्वयम्भुब्रह्मशब्दवाच्याभिमतवेदशब्दप्रकाशितप्रकृष्टज्ञानकर्मसमुच्चयानुष्ठानसामर्थ्यलब्धाणिमाद्यैश्वर्यकलापस्य नारायणप्रसादानुगृहीतस्य योगिनो बाह्येन्द्रियमनोर्थसन्निकर्षात् केवलमनोर्थसन्निकर्षाद्वा अणिमाद्यैश्वर्यकलापसाचिव्यसमन्वितात् [2]अर्थेन्द्रियसम्प्रयोगाद् अस्मदादिबाह्येन्द्रियमनोर्थसन्निकर्षागोचरवर्तमानकालस्थविविधविचित्ररूपादिमत्पदार्थगोचरं वा अतीतानागतवर्तमानगोचरं वा यदुत्पद्यते तदुच्यते। तथाहि बाह्येन्द्रियमनोर्थसन्निकर्षात् वासुदेवप्रसादानुगृहीतो धनञ्जयो विश्वरूपं ददर्शेति गीतासु स्मर्यते। तथा च वार्तिककारः—

[3]"यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता॥"

इति ब्रुवन् अर्जुनादिचक्षुषो विश्वरूपादिलक्षणे स्वगोचरेऽशोकवनिकावस्थितसीतावलोकने सम्पादिचक्षुष इव सामर्थ्यातिशयमङ्गीकरोतीति गम्यते। केवलमनोर्थसन्निकर्षादपि भगवतो वेदव्यासस्य भविष्यद्भारतार्थविज्ञानमभूदिति स्मर्यते। तथा चाह—"योगिनां मन एव स्यादस्माकं सर्वमेव तु" इति।

---

1 B निरपेक्षं स्वयम्भु.

2 D omits अर्थेन्द्रिय–गात्.

3 *Br. bh. v.* 4.176.

नन्वेवं सति मनोमात्रेण धर्माधर्मदर्शनमपि योगिनां स्यादिति वेदस्य पुरुषबुद्धिपूर्वताप्रसङ्गः। नैतत् सारं; वेदस्वातन्त्र्यपूर्वकत्वात् योगिसामर्थ्यस्य। किं चान्यत् योगिनामपि यन्मानसं प्रत्यक्षं तत् कालसंस्पृष्टमेवार्थं भूतं भवन्तं भविष्यन्तं वा बोधयति, न तु कार्यं कालास्पृष्टम्। अतो न धर्माद्यर्थो योगिप्रत्यक्षगोचरः; वेदगोचरस्तु भवति। तथा चाहुः—

"स्वसामर्थ्याद्यथा कार्यं कालास्पृष्टं प्रभाषते।
लिङादिर्यागमप्येवं वक्ष्यतीत्यविशिष्टता" ॥

इति। तस्माद्योगिनां मनोर्थसन्निकर्षमात्रेणातीतानागतवर्तमानार्थग्रहणेऽपि[1] न धर्माधर्मग्रहणप्रसङ्गः; नापि वेदस्य बुद्धिपूर्वताप्रसङ्गः। ननु योगिप्रत्यक्षस्यातीतानागतविषयत्वे वर्तमानग्राहित्वविरोध इति चेत्, न। अतीतानागतरूपेणातीतानागतवस्तुनोऽपि वर्तमानत्वात्। धर्मादिवस्तुनस्तु न केनापि रूपेण वर्तमानता, कार्यैकरूपत्वात्। अतो न प्रत्यक्षगम्यत्वम्। अतश्चोपपन्नं "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वाद्"[2] इति भाष्यकारव्याख्यानम्। अस्यायमर्थः— सता वर्तमानेनार्थेन्द्रियाणां सम्प्रयोगे पुरुषस्य यद् बुद्धिजन्म तत् प्रत्यक्षम्; तच्चानिमित्तमप्रमाणं धर्मे विद्यमानोपलम्भनत्वाद् वर्तमानग्राहित्वात्। धर्मस्य च कार्यैकरूपस्य वर्तमानत्वाभावादिति। अतः तस्य निमित्तपरीष्टिः कर्तव्येति भाष्यकारस्य परीष्टि-

---

[1] C omits अपि. [2] *J. M. S.* 1.1 4.

सूत्रव्याख्यानानुगुणमेवेदं प्रत्यक्षसूत्रव्याख्यानम्। अतो निमित्तपरीक्षाप्रस्थानमपि शोभनम्॥

ननु कर्तृतन्त्रधात्वर्थगतश्रेयस्साधनतारूपं [1]लिङाद्यर्थः। तच्च श्रेयःसाधनतारूपं यद्यपि कालास्पृष्टतया लिङादिप्रत्ययेनोच्यते, तथापि तु लोके प्रमाणान्तरावगम्यमेव; तस्मात् कालास्पृष्टता न प्रमाणान्तरागोचरत्वे कारणम्। सत्यम्; यद्यपि कालासंस्पृष्टता प्रमाणान्तरागोचरत्वे न कारणम्, तथापि प्रत्यक्षागोचरत्वे कारणमेव। तथाहि—यथोक्तश्रेयस्साधनता लोके दृष्टान्वयव्यतिरेकसमधिगम्या। अन्वयव्यतिरेकौ च सामान्यतोदृष्टपरिशेषानुमानात्मकावर्थापत्त्यात्मकौ वा। तत्रान्वयव्यतिरेकाभ्यां गवानयनादिधात्वर्थव्यक्तेस्तदनन्तरफलदर्शनात् फलसाधनतामवगम्यान्यस्यापि तज्जातीयस्य व्यक्त्यन्तरस्य तथाविधफलसाधनतामनुमाय स्वयं प्रवर्तते। तत्र व्याप्तिं गृहीत्वा पुरुषान्तरेऽपि तथाविध [प्रत्यय ? प्रवृत्ति[2]]मुपलभ्य तथाविधश्रेयःसाधनताज्ञानमनुमिनोति। तस्माच्छ्रेयस्साधनता लोकेऽनुमेयैव सर्वत्र। वेदे तु [3]स्वर्गाद्युपसृष्टानुमानस्यापि न गोचरमिति वैषम्यम्। योगिप्रत्यक्षगोचरमिति चेत् न; त्र्यैकाल्यगोचरत्वात् तस्य। तथाहि, त्रैकाल्यदर्शिनो हि योगिनो भवन्ति, तथा [प्रसिद्धो ? [4]प्रसिद्धेः]। न तु सर्वदर्शिनः, तथात्वे प्रमाणाभावात्। अतो योगिप्रत्यक्षमपि त्रैकाल्यगोचरमेव, न तु त्रिकालातीतकार्याद्यर्थगोचरम्। अतो विशेषतः स्वर्गाद्युपसृष्टश्रेयस्साधनता-

1 C omits लिङाद्यर्थः.
2 Suggestion in D.
3 B स्वजात्यु.
4 प्रसिद्धदर्शिनो suggestion in D.

लिङ्गितयागादिधात्वर्थात्मकश्चोदनालक्षण एव नेन्द्रियादि-लक्षण इति सूक्तम्। अतो योगिप्रत्यक्षस्यातीतानागतविषयत्वेऽपि सर्वं समञ्जसम्॥

अन्ये पुनर्भूताद्यर्थभावनाप्रकर्षपर्यन्तोद्भवं योगिप्रत्यक्षमाहुः। तदसत्। अन्यत्र चोदनापरिप्रापणात् भावनायाः भ्रान्तिहेतुत्वदर्शनात्। तथाहि-व्याघ्राद्यर्थं भयादिवशेन भावयतः तत्रापरोक्षभ्रान्त्युत्पत्तिः दृश्यते, यथा व्याघ्रोऽयं व्यालोयमिति। न तु प्रमाणज्ञानोत्पत्तिः, अतो यत्किञ्चिदेतत्॥

अवसितं योगिप्रत्यक्षम्। अयोगिप्रत्यक्षं ब्रूमः। प्रकृष्टज्ञानकर्मजनितसामर्थ्यातिशयरहितेन्द्रियमनोऽर्थसन्निकर्षजम् अयोगिप्रत्यक्षम्। यथा अस्मदादेरर्थेन्द्रियसम्प्रयोगाद् रूपादिज्ञानम्। अत्राह ननु अपरमपि प्रत्यक्षमेश्वरमस्ति; तत्किमिति न लक्षयसीति। नैतत् सारम्; ईश्वरस्य बुद्ध्यभावात्। बुद्धिविशेषो हि प्रत्यक्षम्। न च ईश्वरस्य बुद्धिः। कार्य[1]करणरहितत्वात्। "न तस्य कार्यं [2]करणं च विद्यते" इति श्रुतेः। बुद्ध्यभावेऽपि ब्रह्मण ईक्षणमस्तीति न [3]जगत्सर्गविरोधः। ननु बुद्धिरेवेक्षणम्। सत्यं; संसारिणामीक्षणं बुद्धिरेव; न तु ब्रह्मणः; किं तर्हि ? अव्याकृतनामरूपविषयो [4]ब्रह्मणो जडशक्तेराद्यो विकारो बीजस्येवोच्छूनता चैतन्यव्याप्तो ब्रह्मण ईक्षणमुच्यते। ननु लोकप्रसिद्धेक्षणानभ्युपगमे ब्रह्मण

---

1 A B D कारण.
2 A कारणं.
3 D जगत्सर्गाविरोधः.
4 D omits ब्रह्मणो—राद्यो.

एकाङ्गविकलं गौणमीक्षणं स्यात्। सत्यम्; बुद्ध्यंशविरहादेकाङ्गवैकल्यनिबन्धनं ब्रह्मण ईक्षणस्य गौणत्वमिष्टमेव; प्रधानादीक्षणवत् सर्वाङ्गवैकल्यनिबन्धनमेव तु गौणत्वं नेष्यते। तस्मात् ब्रह्मणो बुद्ध्यनभ्युपगमेऽपि न कश्चिद्विरोधः इति नैश्वरं प्रत्यक्षमस्ति बुद्ध्यभावादिति सूक्तम्। यत्पुनरीश्वरस्य स्वेच्छाविग्रहेष्वस्मदाद्यतीन्द्रियार्थविषयमपरोक्षं बुद्धिविज्ञानं, तदपि योगिप्रत्यक्षमेव; अणिमाद्यैश्वर्यकलापबलोपबृंहितार्थेन्द्रियसम्प्रयोगजन्यत्वाविशेषात्। इतरच्च सर्वप्राणिसाधारणं प्रत्यक्षमीश्वरस्यापि तत्राऽयोगिप्रत्यक्षेऽन्तर्भूतमिति न किञ्चिदपि [1]विशिष्टमस्तीति सिद्धम्। तस्मादुपपन्नं "तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म (तत् ? सत्) प्रत्यक्षम्" इति अव्यभिचारसिद्धये वृत्तिकारव्याख्यानम्। अत्र च बुद्धिजन्मेति जन्मग्रहणं बुद्धेर्जन्म[2]मात्रमेव व्यापारो न जाताया: फलाय व्यापारान्तरमस्तीति ज्ञापनार्थम्। तथाहि–

[3]"व्यापारः कारकाणां हि दृष्टो जन्मातिरेकतः।
ज्ञानेऽपि हि तथा मा भूदिति जन्माभ्युपेयते॥"

इति। उपलक्षणार्थं चैतत् सूत्रमुत्तरप्रमाणलक्षणानां, तत्र सूत्रान्तराभावात्। तस्मात् प्रत्यक्षं तावदेवंलक्षणत्वान्न व्यभिचरतीति सिद्धम्॥

प्रत्यक्षलक्षणं समाप्तम्

---

1 B शिष्टं
2 D मात्रेण.
3 *Ślokavārtika-Pratyakṣa. Sl.* 54.

साधनधर्मदर्शनात् साध्यधर्मविशिष्टे धर्मिणि बुद्धिरनुमानम्। व्याप्यं साधनम्; व्यापकं साध्यम्; व्याप्तिः अविनाभावः। सा च अविनाभावसंशब्दिता व्याप्तिः द्विविधा, अन्वयव्याप्तिः; व्यतिरेकव्याप्तिश्चेति। अन्वयमुखेन व्याप्तिः अन्वयव्याप्तिः; व्यतिरेकमुखेन व्याप्तिः व्यतिरेकव्याप्तिः। साधनसद्भावे साध्यसद्भावोऽन्वयः। साध्याभावे साधनाभावो व्यतिरेकः। अन्वयनियमोऽन्वयव्याप्तिः, साधनसद्भावे साध्यसद्भावनियमोऽन्वयव्याप्तिरित्यर्थः। साध्यसामान्येन साधनसामान्यस्यानुगम्यमानता यथा--यत्र धूमस्तत्राग्निरस्त्येवेत्यग्निना धूमस्यानुगम्यमानता। व्यतिरेकनियमो व्यतिरेकव्याप्तिः; साध्याभावे साधनाभावनियम इत्यर्थः। साधनसामान्याभावेन साध्यसामान्याभावस्यानुगम्यमानता यथा—यत्राग्निर्नास्ति तत्र धूमोऽपि नास्त्येवेति धूमाभावेनाग्न्यभावस्यानुगम्यमानता। तदेवं व्याप्यं साधनं; व्यापकं साध्यं; साधनमेव धर्मः साधनधर्मः; साध्यमेव धर्मः साध्यधर्मः। साधनधर्मदर्शनात् साध्यधर्मविशिष्टे धर्मिणि बुद्धिरनुमानम्। एतदुक्तं भवति फलतः साधनधर्मविशिष्टधर्मिदर्शनात् साध्यधर्मविशिष्टे धर्मिणि बुद्धिरनुमानमिति। यदि वा साधनं धर्मो यस्यासौ साधनधर्मा; तस्य साधनधर्मणो दर्शनं साधनधर्मदर्शनं; तस्मात् साधनधर्मदर्शनात् साध्य-

धर्मविशिष्टे धर्मिणि बुद्धिरनुमानमिति कण्ठोक्तमेव। तदुक्तम्

[1]"असिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः" इति। भाष्यकारेणाप्युक्तम्—

[2]"एकदेशदर्शनादेकदेशान्तरे असन्निकृष्टेऽर्थे बुद्धिः" इति।

द्विविधमनुमानं सामान्यतोदृष्टं विशेषतोदृष्टं च। नित्यानुमेयार्थविषयं सामान्यतोदृष्टं; यथा—देशान्तरप्राप्ति-लिङ्गादादित्यगत्यनुमानम्। कार्यतः[3] कारणानुमानं सामान्यतोदृष्टमिति केचित्। यथा—विद्युदादिकार्यदर्शनात् तत्कारणं किञ्चिदस्तीत्यनुमानम्। प्रत्यक्षयोग्यार्थविषयं विशेषतोदृष्टम्। यथा धूमादग्न्यनुमानम्। विशिष्टलिङ्गेन विशिष्टलिङ्ग्यनुमानं विशेषतोदृष्टमिति केचित्, यथा चन्दनधूमेन चन्दनाग्न्यनुमानम्। तत्पुनर्द्विविधम्—स्वार्थं परार्थं च। परोपदेशानपेक्षं स्वार्थं; परोपदेशसापेक्षं तु परार्थमिति। परोपदेशस्तु पञ्चावयवं वाक्यम्। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः। प्रतिज्ञोपदेशनिदर्शनानुसन्धानप्रत्याम्नाया अवयवा इत्यर्थः॥

तत्र हेत्वाकाङ्क्षाजनकं पक्षवचनं प्रतिज्ञा। यथा मिथ्या जागरितमिति। तृतीयापञ्चम्योरन्यतरविभक्त्यन्तं साधनवचनं हेतुः। यथा दृश्यत्वेन, दृश्यत्वाद् इति। स त्रिविधः।

---

1 *Ślokavārtika - anumāna. Śl.* 25.

2 B एकदर्शनादेकदेशान्तरे. *Śābara-bhāṣya* under sutra 1.1.5.

3 D कार्यत्ता (?र्यात्).

अन्वयव्यतिरेकी, केवलान्वयी केवलव्यतिरेकी च। तत्र पञ्चरूपोऽन्वयव्यतिरेकी; चतूरूपस्तु केवलान्वयी केवलव्यतिरेकी च। नैतच्चतूरूपत्वमनयोर्लक्षणम्; किन्त्वन्वयव्यतिरेकिलक्षणस्य [1]पाञ्चरूप्यस्य व्यभिचारनिराकरणार्थमेतद्वचनम्। रूपाणि पुनः—पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वम् असत्प्रतिपक्षत्वं चेति। प्रतिपिपादयिषितधर्मविशिष्टो धर्मी पक्षः। तद्व्यापकत्वं हेतोः पक्षधर्मत्वम्। साध्यसमानधर्मा धर्मी सपक्षः। साधर्म्यदृष्टान्तः सपक्ष इत्यर्थः। तत्र वृत्तिमात्रं हेतोः सपक्षे सत्त्वम्। साध्यव्यावृत्तधर्मा धर्मी विपक्षः। वैधर्म्यदृष्टान्तो विपक्ष इत्यर्थः। तस्मिन् हेतोरगमनं विपक्षाद्व्यावृत्तिः। प्रमाणाविरुद्धे प्रतिज्ञातार्थे वृत्तिरबाधितविषयत्वम्। साध्यतद्विपरीतयोः साधनस्य[2] त्रिरूपत्वमसत्प्रतिपक्षत्वम्। एतानि पञ्चरूपाणि अन्वयव्यतिरेकिणो विद्यन्ते इत्यन्वयव्यतिरेकी पञ्चरूपः। विपक्षाभावेन विपक्षाद् व्यावृत्यभावात् केवलान्वयी चतूरूपः। सपक्षाभावेन सपक्षवृत्यभावात् केवलव्यतिरेक्यपि चतूरूप एव। नैतदनयोर्लक्षणम्; किन्तु पूर्वोक्तस्यान्वयव्यतिरेकिलक्षणस्य पञ्चरूपस्यातिव्याप्तिपरिहारार्थमेतद्वचनम्; लक्षणस्यानयोरग्रे वक्ष्यमाणत्वाद्, अन्यस्य च व्यभिचारित्वात्॥

तत्रान्वयव्यतिरेकी द्विविधः। सपक्षैकदेशवृत्तिः सपक्षव्यापकश्चेति। तत्र सपक्षैकदेशवृत्तिर्यथा—मिथ्या जाग्रद्भेदो धर्मिप्रतियोगिसापेक्षत्वात्, स्वप्नप्रपञ्चवद् इति। सपक्षव्यापको

---

1 D पञ्चरूपस्य. 2 B—स्यात्रिरूपत्वं.

यथा—मिथ्या जाग्रत्प्रपञ्चः, दृश्यत्वात् स्वप्नप्रपञ्चवद् इति। अथवा जन्मवदाकाशम् अनित्यगुणाश्रयत्वादिति सपक्षैकदेशवृत्तिः। विभक्तृत्वादिति सपक्षव्यापकः। पक्षव्यापकस्सपक्षवृत्तिरविद्यमानविपक्षः केवलान्वयी पूर्ववद् द्विविधः। तद्यथा - विवादास्पदीभूतः कर्तृत्वादिः परमार्थत आत्मधर्मो न भवति; दृश्यत्वादिति समक्षैकदेशवृत्तिः, प्रसिद्धत्वादिति सपक्षव्यापकः। पक्षव्यापको [1]अविद्यमानसपक्षो विपक्षाद् व्यावृत्तः केवलव्यतिरेकी—यथा वाङ्मनसगोचरातीतः प्रत्यगात्मा, बोद्धृत्वात्; यस्तु वाङ्मनसगोचरातीतो न भवति स बोद्धापि न भवति यथा घटादिरिति। प्रसङ्गद्वारेण वा—नेदं जीवच्छरीरं निरात्मकम्, अप्राणादिमत्त्वप्रसङ्गात् लोष्टवदिति। एतेन सर्वहेत्वाभासानामहेतुत्वमुक्तं भवति॥

हेतुलक्षणरहिता हेतु[2]वदाभासमाना हेत्वाभासाः। असिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमसप्रतिसाधना हेत्वाभासाः। तत्रानिश्चितपक्षवृत्तिरसिद्धः। पक्षविपक्षयोरेव वर्तमानो विरुद्धः। पक्षत्रयवृत्तिरनैकान्तिकः। साध्यासाधकः पक्ष एव वर्तमानोऽनध्यवसितः। बाधितप्रतिज्ञानन्तरमुपन्यस्तः कालात्ययापदिष्टः। पक्षप्रतिपक्षयोस्त्रिरूपः प्रकरणसमः। एकत्र तुल्यलक्षणविरुद्धहेतुद्वयोपनिपातो विरुद्धाव्यभिचारी सप्रतिसाधनः॥

तत्रासिद्धो द्वादशविधः। स्वरूपासिद्धो यथा—परमार्थसत्यं द्वैतं, स्वयम्प्रमत्वात्। [3]अधिकरणासिद्धो यथा—

---

1 A विद्यमानसपक्षोऽपि पक्षाद्व्यावृत्तः, D विद्यमानविपक्षोऽपि सपक्षाद्व्यावृत्तः.
2 A D दवभासमाना.
3 B व्यधिकरणा.

बहवः पुरुषाः सुखदुःखादीनां व्यवस्थितत्वात्। विशेषणासिद्धो यथा—परमाथः प्रपञ्चः, स्वयम्प्रभत्वे सति नानारसत्वात्। विशेष्यासिद्धो यथा—परमार्थः प्रपञ्चः नानारसत्वे सति स्वयम्प्रभत्वात्। भागासिद्धो यथा—परमार्थः प्रपञ्चः, चाक्षुषत्वात्। आश्रयासिद्धो यथा—सन्ति परमाणवः, द्व्यणुकादिक्रमेण कार्यारम्भकत्वात्। आश्रयैकदेशासिद्धो[1] यथा— नित्या जीवेश्वरपरमाणवः; अनादित्वात्। व्यर्थविशेषणासिद्धो यथा—परमार्थसत्यं द्वैतं, जडत्वे सति अबाध्यत्वात्। व्यर्थविशेष्यासिद्धो यथा—परमार्थसत्यं द्वैतम्, अबाध्यत्वे सति जडत्वात्। सन्दिग्धासिद्धो यथा—धूमबाष्पादिविवेकानिश्चये कश्चिदग्निमानयं प्रदेशः धूमवत्वात्। सन्दिग्धविशेषणासिद्धो यथा—अद्यापि क्लेशदूषितबुद्धी कणादाक्षपादौ, अद्याप्यनुत्पन्नतत्त्वज्ञानत्वे सति पुरुषत्वात्। सन्दिग्धविशेष्यासिद्धो यथा—अद्यापि क्लेशदूषितबुद्धी कणादाक्षपादौ, पुरुषत्वे सति सर्वदा तत्त्वज्ञानरहितत्वात्। एतेऽसिद्धभेदाः यदोभयवाद्यसिद्धत्वेन विवक्षितास्तदोभयासिद्धा भवन्ति। यदोभयवाद्यसिद्धत्वेन न विवक्षितास्तदान्यतरासिद्धा भवन्तीति॥

विरुद्धोऽष्टविधः। तत्र सति सपक्षे चत्वारो विरुद्धाः। पक्षविपक्षव्यापको यथा—सत्यं जागरितम्, अज्ञानकल्पितत्वात्। विपक्षैकदेशवृत्तिः पक्षव्यापको यथा—सत्यो [2]जाग्रद्भेदो [3]धर्मिप्रतियोगिसापेक्षत्वात्। [4]पक्षविपक्षैकदेशवृत्तिर्यथा—

1 D सिद्धि.
2 A D जागरिततद्भेदो.
3 A D धर्मी प्रति.
4 D [सपक्ष]विपक्षैक, A omits पक्ष.

सत्यं जागरितं धर्मिप्रतियोगिसापेक्षत्वात्। पक्षैकदेशवृत्ति-र्विपक्षव्यापको यथा—वाय्वाकाशौ महाभूते न भवतः, स्पर्शव-त्त्वात्। असति सपक्षे चत्वारो विरुद्धाः। पक्षविपक्षव्यापको यथा—विवादास्पदीभूतः कर्तृत्वादिः परमार्थत आत्मधर्मः प्रसिद्धत्वात्। पक्षविपक्षैकदेशवृत्तिर्यथा—विवादास्पदीभूत-कर्तृत्वादितद्गतचिदाभासौ परमार्थत आत्मधर्मौ धर्मफल-त्वात्। पक्षव्यापको विपक्षैकदेशवृत्तिर्यथा—विवादास्पदीभूतः कर्तृत्वादिः परमार्थत आत्मधर्मः, कर्मफलत्वात्। विपक्ष-व्यापकः पक्षैकदेशवृत्तिर्यथा—सर्वं जडं चिदात्मनि कल्पितम् अनादित्वात्। ननु चत्वार एव विरुद्धभेदाः, नान्ये, तेषा-मसिद्धलक्षणोपपन्नत्वेनासिद्धत्वम्। नैष दोषः। उभयलक्ष-णोपपन्नत्वेन उभयव्यवहारविषयत्वात्, तुलायां प्रमाणप्रमेय-व्यवहारवत्॥

अनैकान्तिकोऽष्टविधः। पक्षत्रयव्यापको यथा—सत्यं जागरितं, प्रसिद्धत्वात्। पक्षव्यापकः सपक्षविपक्षैकदेशवृत्ति-र्यथा—वेदैकसमधिगम्यः प्रत्यगात्मा, पुरुषार्थत्वात्। पक्ष-सपक्षव्यापको विपक्षैकदेशवृत्तिर्यथा—गौरयं विषाणित्वात्। पक्षविपक्षव्यापकः सपक्षैकदेशवृत्तिर्यथा—नायं गौः, विषाणि-त्वात्। पक्षत्रयैकदेशवृत्तिर्यथा—इन्द्रियाणि वाक्चक्षुःपाणि-पादाः ज्ञानोत्पत्तौ साधकतमत्वात्। पक्षसपक्षैकदेशवृत्ति-र्विपक्षव्यापको यथा—पृथिव्याकाशौ महाभूते, अमूर्तत्वात्। तत्र विपक्षत्वाभिमते ब्रह्मणी सगुणनिर्गुणे। पक्षविपक्षैकदेशवृत्तिः सपक्षव्यापको यथा—न महाभूते पृथिव्याकाशौ, अमूर्तत्वात्॥

षोढानध्यवसितः। अविद्यमानसपक्षविपक्षः पक्षव्यापको यथा–सर्वं क्षणिकं [रसत्वात्? सत्त्वात्]। अविद्यमानसपक्षविपक्षः पक्षैकदेशवृत्तिर्यथा–सर्वं क्षणिकम्, कार्यत्वात्। विद्यमानसपक्षविपक्षः पक्षव्यापको यथा–नित्या भूः, गन्धवत्त्वात्। विद्यमानसपक्षविपक्षः पक्षैकदेशवृत्तिर्यथा—नित्ये भूजले, गन्धवत्त्वात्। अविद्यमानविपक्षो विद्यमानसपक्षः पक्षव्यापको यथा–सर्वं जडं नित्यम्, बाध्यत्वात्। अविद्यमानविपक्षो विद्यमानसपक्षः पक्षैकदेशवृत्तिर्यथा–सर्वं जडं परमार्थसत्यम् उत्पत्तिमत्त्वात्। अनध्यवसितोऽसाधारणानैकान्तिको नाम कश्चिदनैकान्तिकभेदो न पृथक् हेत्वाभास इति केचित्। अस्मिंस्तु पक्षे अनिश्चायकत्वं संशयहेतुत्वं चानैकान्तिकसामान्यलक्षणं द्रष्टव्यम्॥

कालात्ययापदिष्टः षड्विधः। प्रत्यक्षविरुद्धो यथा–अनुष्णोऽग्निः, कार्यत्वात्। अनुमानविरुद्धो यथा–चक्षू रूपोपलब्धिं न करोति, इन्द्रियत्वात्। शास्त्रविरुद्धो यथा–अग्नीषोमीयादिरनर्थहेतुः प्राणिप्रमाप[न ? ण]त्वात् वृथाप्राणिहिंसनवत्। अर्थापत्तिविरुद्धो यथा–नायमग्निर्दाहशक्तिमान्, द्रव्यत्वात् आकाशवद् इति। उपमानविरुद्धो यथा–नायं गवयो गोसदृशः, चतुष्पात्वात्, अश्ववदिति। योग्यानुपलब्धिविरुद्धो यथा–अश्वादयो विषाणिनः, चतुष्पात्त्वात् गोवदिति। [1]अनुभवविरुद्धो यथा–विवादास्पदीभूताः कामसङ्कल्पादयो मनोधर्माः न भवन्ति, जनिमत्त्वात् घटवदिति॥

---

1 According to *Prābhākaras* अनुभव or the first apprehension is *Pramā*.

प्रकरणसमस्योदाहरणं यथा–नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात्, सपक्षवदिति ॥

सप्रतिसाधनस्योदाहरणं [1]यथा–बुद्धिपूर्वा वेदाः, वाक्यत्वात्, लौकिकवाक्यवत्। अबुद्धिपूर्वा वेदाः अहरहर्व्यवह्रियमाणत्वे सति अस्मर्यमाणकर्तृकत्वात् आत्मवदिति ॥

सम्यग्दृष्टान्ताभिधानमुदाहरणम्। सम्यगभिधानमुदाहरणमित्युक्ते प्रतिज्ञादेरप्युदाहरणत्वप्रसङ्ग इति दृष्टान्तग्रहणम्। दृष्टान्ताभिधानमसम्यगप्यस्तीति सम्यग्ग्रहणम्। व्याप्तिग्रहणभूमिर्दृष्टान्तो यत्र स्थित्वान्वयव्यतिरेकिव्याप्तिग्रहणम्। यत्र लौकिकपरीक्षकाणां बुद्धिसाम्यं दृष्टं स दृष्टान्तः। तस्य सम्यगभिधानमुदाहरणम्। तद् द्विविधम्–अन्वयमुखेन दृष्टान्ताभिधानं साधर्म्योदाहरणम्। यथा–मिथ्या जागरितं दृश्यत्वात्; यद् दृश्यं तन्मिथ्या यथा स्वप्नदृश्यमिति। व्यतिरेकमुखेन दृष्टान्ताभिधानं वैधर्म्योदाहरणम्; यन्मिथ्या न भवति तद् दृश्यमपि न भवति, यथा दृक्स्वरूपमिति। एतेनोदाहरणाभासानामनुदाहरणत्वमुक्तं भवति ॥

उदाहरणलक्षणरहिता उदाहरणवदवभासमाना उदाहरणाभासाः। ते च द्वादशविधाः–षट् साधर्म्योदाहरणाभासाः, तथा षड्वैधर्म्योदाहरणाभासा इति। मनसो नित्यत्वसाधनविशेषवादिवैशेषिकैकदेशी यःकश्चिद्वैशेषिकं प्रत्याह–अनित्यं मनः मूर्तत्वादिति। तस्मिन्नेव प्रयोगे सर्वेष्युदा-

[1] D omits यथा.

हरणाभासाः प्रदर्श्यन्ते। यथा यद्यन्मूर्तं तत्तदनित्यं दृष्टं, यथा परमाणुरिति तद्दृष्ट्या साध्यविकलः[1]। यथा कर्मेति साधनविकलः[2]। यथा आकाशमिति उभयविकलः। यथा वन्ध्यापुत्र इत्याश्रयहीनः। घटवदित्यनुगमः। यन्नित्यं तन्मूर्तं दृष्टमिति विपरीतानुगमः। अन्त्यौ तु वचनदोषौ। एते षट् साधर्म्योदाहरणाभासाः। यत्तु नित्यं तन्मूर्तमपि न भवति [3]यथा परमाणुरिति साधनव्यावृत्तः[4]। यथा कर्मेति साध्यव्यावृत्तः। यथा घट इति उभयव्यावृत्तः। यथा वन्ध्यापुत्र इति आश्रयहीनः। आकाशवदित्यव्यावृत्तः। यन्मूर्तं न भवति तदनित्यं न भवति यथाकाशमिति विपरीतव्यावृत्तः। अत्राप्यन्त्यौ वचनदोषौ। एते षट् वैधर्म्योदाहरणाभासाः इति॥

अन्ये तु सन्देहमुखेनापरानप्टानुदाहरणाभासान् दर्शयन्ति। सन्दिग्धसाध्यो यथा–महाराज्यं करिष्यत्येष राजपुत्रः, सोमवंश्यत्वाद् विवक्षितराजपुत्रवत्। सन्दिग्धसाधनो यथा–नायं सर्वज्ञः, रागादिमत्त्वाद् अद्यागतपान्थपुरुषवत्। सन्दिग्धोभयो यथा–गमिष्यति स्वर्गं विवक्षितः पुरुषः, समुपार्जितशुक्लधर्मत्वाद् अद्यागतापरिचितपुरुषवत्। सन्दिग्धाश्रयो यथा–नायं सर्वज्ञः बहुवक्तृत्वाद् भविष्यद्देवपुत्रवत्। सन्दिग्धसाध्यव्यावृत्तो यथा–यो [5]महाराज्यं न करिष्यति, स सोमवंश्यो न भवति यथाऽन्यो राजपुत्रः। सन्दिग्धसाधनव्यावृत्तो यथा–यः सर्वज्ञः

---

1 A लम्.
2 A लम्.
3 B C D omit यथा परमाणुरिति.
4 D त्तम्.
5 D माहा[? यो] महा.

स रागादिरहितः,[1] यथा समस्तशास्त्रार्थज्ञः पुरुषः। सन्दिग्धोभयव्यावृत्तो यथा–यःस्वर्गं न गच्छति[2] स समुपार्जितशुक्लधर्मापि न भवति दुष्टपुरुषवत्। सन्दिग्धाश्रयो यथा–[3]यः सर्वज्ञः स बहुवक्तापि न भवति, भविष्यद्देवपुत्रवत्॥

दृष्टान्ते प्रसिद्धाविनाभावस्य साधनस्य दृष्टान्तोपमानेन पक्षे व्याप्तिव्यापकं वचनमुपनयः। यथा–[4]तथा] चेदं दृश्यं जागरितमिति साधर्म्योपनयः; तथा अदृश्यं न भवति इदं जागरितमिति वैधर्म्योपनयः॥

उपनयानन्तरं सहेतुकं प्रतिज्ञायाः पुनर्वचनं निगमनम्। तस्मान्मिथ्यैव जागरितमिति। न चेदमसाधनाङ्गं निगमनम्। विपक्षे बाधकप्रमाणसद्भावसूचकत्वादस्य। न च विपक्षे बाधकमन्तरेण साध्यावधारणं सम्भवति। तथा चोक्तं [5]"विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णय" इति। पक्षप्रतिपक्षाभ्यामिति साधनदूषणाभ्यामित्यर्थः। तस्मान्निगमनप्रतिपाद्यार्थसद्भावादस्ति निगमनम्। ब्रह्मवित्समये निगमनं नास्तीति चेन्न, यत आह—

[6]हेतूक्तितः प्रतिज्ञायाः सिद्धार्थाया यदुत्तरम्।
वचो निगमनं तत् स्याद्वाक्यस्यावयवोऽन्तभाक्"॥

इति। भाष्यकारोऽप्याह "निगमनस्थानीयं मैत्रेयीब्राह्मणम्"

---

1 D सहित:.
2 D गमिष्यति.
3 D स:.
4 A D omit [तथा], suggection in B.
5 *N. S.* I. 1.41.
6 *Br. bh. v.* IV. 5.4.

इत्यादितः[1]। शाबरमपि भाष्यमुपनयनिगमनसद्भावं सूचयति। ननु सर्व एव निरालम्बनः प्रत्ययः। प्रत्ययस्य[2] हि निरालम्बनतास्वभाव उपलक्षितः स्वप्ने। जाग्रतोऽपि स्तम्भ इति वा कुड्य इति वा प्रत्ययापेक्षा[3] भवति। तस्मात् सोऽपि निरालम्बन एव इति निदर्शनात्। स एष परमो न्यायः यद्विप्रतिपन्नं पुरुषं प्रति पञ्चावयवं वाक्यम्। तत्सापेक्षं परार्थानुमानम्। एवं स्वार्थं परार्थं च द्विविधमनु ानम्॥

"विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यता" इति चार्वाकस्य यः पर्यनुयोगः सोऽग्निधूमजात्याक्रान्ताकारेण व्यक्त्योरेव व्याप्यव्यापकभावाभ्युपगमेन गम्यगमकभा:-भ्युपगमाच्च निरस्तः॥

अन्ये पुनः प्रत्यक्षपूर्वकं त्रिविधमनुमानमाहु, पूर्ववत्, शेषवत् सामान्यतोदृष्टं चेति। तत्र पूर्ववत् पूर्वं कारणं; पूर्वमस्यास्तीति पूर्ववत्, कारणवदित्येतत्। कारणेन कार्यानुमानं यथा—विशिष्टमेघोन्नतिदर्शनाद् भविष्यति वृष्टिरिति। शेषवत् कार्यवत्; शेषोऽस्यास्तीति शेषवत्; उक्तात् कारणादन्येन शेषेण कार्येण कारणानुमानं यथा नदीपूरविशेषाद्भूद् वृष्टिरिति। कार्यकारणयोरन्यतरदर्शनादन्यतरप्रतिपत्तिः सामान्यतोदृष्टं—यथा सवितुरुदयगिरिमूर्धनि दृष्टस्यास्तगिरिमस्तके दर्शनाद् व्रज्यानुमानम्। तथा च मनुरस्य नुमानत्रयस्य सद्भावं दर्शयति, प्राप्तिपूर्वकत्वात् प्रतिषेधस्य—

1 A D इत्यादि। ततः शाबर.
2 A B प्रत्ययत्वात्.
3 B प्रत्ययो.

[1]"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः" ॥ इति ॥

अत्राप्रज्ञातमिति प्रत्यक्षप्रतिषेधः । अलक्षणमिति पूर्ववदनुमाननिषेधः । अप्रतर्क्यमिति शेषवदनुमाननिषेधः। अविज्ञेयमिति सामान्यतोदृष्टनिषेधः । एतच्चानुमानत्रयं व्याप्तिबलात् ॥

अत्राह का पुनरियं व्याप्तिः ? किंच तस्यां प्रमाणम् ? उच्यते । व्याप्तिरविनाभावः । अन्वयव्यतिरेकौ च तस्यां प्रमाणम् । कः पुनरविनाभावः—अग्निस्वरूपम्, आहोस्विद् धूमस्वरूपम्, अथवा तयोः कार्यकारणभावः, किं वा तत्त्वान्तरम् ? यदा तत्त्वान्तरं तदापि किं स्वतन्त्रम्, उत तदाश्रयम् ? यदा तदाश्रयं तदापि किम् अग्न्याश्रयम्, उत धूमाश्रयम्, आहोस्विदुभयाश्रयम्— इति विकल्पः । अन्वयव्यतिरेकावपि किं प्रत्यक्षान्तर्भूतौ, आहोस्विदनुमानान्तर्भूतौ, अथवार्थापत्त्यात्मकौ—इति तत्रापि विकल्पः ॥

उच्यते । धूमाश्रय एव कश्चिद्धर्मोऽविनाभाव इति वदामः । स च नात्यन्तमभिन्नः, नाप्यत्यन्तं भिन्नः । किन्तु तदात्मक एव कश्चिन्नियमविशेषः, तथा प्रतीतेः । न [2]चैष तयोः कार्यकारणभावोऽस्य धूमैकनिष्ठत्वात्, कार्यकारणभावस्य चोभयनिष्ठत्वात् । तस्मात् तत्त्वान्तरमविनाभावः । न च स्वतन्त्रः नाप्युभयतन्त्रः, धूमैकतन्त्रत्वात् । अन्वयव्यतिरेकौ च तत्र प्रमाणम्, प्रत्यक्षान्तर्भूतावनुमानान्तर्भूतावर्थापत्त्यन्तर्भूतौ वा विरोधाभावात् । प्रत्यक्षान्तर्भावपक्षे भूयोदर्शन-

1 *M. S.* I. 5. 2 A D चैतयोः.

संस्कारसहितार्थेन्द्रियसम्प्रयोगाद् व्याप्तिविज्ञानोत्पत्तिरिति योजयितव्यम्; वैशेषिकादिवद् अन्वयव्यतिरेकयोर्मानस-प्रत्यक्षान्तर्भावानभ्युपगमात्। अन्यथासिद्धिप्रयोजकसंशयाव-न्वयव्यतिरेकदूषणम्। तदभावे तयोरौत्सर्गिकं प्रामाण्यमनप-वादं भवति प्रत्यक्षान्तर्भावपक्षे। अर्थापत्यन्तर्भावपक्षे पुनरन्य-थासिद्धा[1]वर्थापत्तिरेव नास्तीति प्रापकाभावादेव कार्याभाव:; न प्रतिबन्धकसद्भावात्। अनुमानत्वपक्षेऽप्यन्यथासिद्धावेवा-न्वयव्यतिरेकौ व्याप्त्यादिलिङ्गमिति व्याप्याभावादेव व्याप्ति-ज्ञानलक्षणकार्याभाव:, न प्रतिबन्धकसद्भावात्। अन्यथा-सिद्धिर्यथा — अग्निसामीप्यात् पाषाणधूमयो:, क्वचित् तत्तन्त्रत्वाद् यथा धूमपैङ्गल्ययो:, क्वचिदेककारणकार्यत्वाद् यथा भस्मधूमयो:; क्वचित्[2] कारणकारणत्वाद्[3] यथा पितामहपौत्रयो:, क्वचित्कारणेन समानाश्रयत्वाद् अकारणस्य कार्यान्वयव्यतिरेकयोरन्यथासिद्धि:, यथा गुरुत्वात् पाषाणस्य पतने पाषाणगतरूपादिना तदीयपतनान्वयव्यतिरेकयो:, क्वचित्कारणप्रतिबन्धकाभावत्वात् तस्य कार्येण सह अन्वय-व्यतिरेकयोरन्यथासिद्धि: यथा मणिमन्त्राद्यभावस्य धूमेन सह, [4]क्वचित्प्रतिबन्धकप्रतिबन्धकत्वात् तस्य कार्येण सह अन्वयव्यतिरेकयो: अन्यथासिद्धि: यथा प्रतिमन्त्रस्य धूमेन सहेति। एवंप्रकारमप्यूह्यं प्रयोजकसंशयस्योदाहरणम्॥

मन्त्रार्थवादानामन्यपरत्वाद् विषभक्षणादिवाक्यवद्य-

---

1 द्धा [र ? क] suggestion in D.
2 B omits क्वचित्.
3 A D कार्यकारणत्वात्.
4 D क्वचित्प्रतिबन्धकत्वात्.

थ.श्रुतेऽर्थे न प्रामाण्यमिति मीमांसकेनोक्ते वेदान्तवाद्याह-सन्दिग्धं प्रयोजकं किं प्रमाणान्तरेण बाधाद्विषभक्षणादि-वाक्यस्य यथाश्रुतेऽर्थेऽप्रामाण्यम्, आहोस्विदन्यपरत्वादिति। तदेवमन्यथ सिद्धिप्रयोजकसंशयाभावेऽन्वयव्यतिरेकौ व्याप्त्यादिग्रहणनिमित्तमिति सिद्धम्। अतोऽनुमानात्मकत्वमेवान्वयव्यतिरेकयोरस्मद्दर्शने। कस्मात ? आप्तवचनात्। तथा हि भगवत्पादीय[1]वचनम्—

[2]अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च।
स्यादेतदहमित्यत्र युक्तिरेवावधारणा ॥ इति

युक्तिरत्रानुमानलक्षणा, न पुनस्पर्कः; अन्यत्रान्वयव्यतिरेकयोः स्पष्टमनुमानशब्देन[3] निर्देशात्; तथाह्यन्वयव्यतिरेकौ प्रत्याह—

[4]"अनुमानप्रदीपेन हित्वा सर्वाननात्मनः।
संसारैकावलम्बिन्या तदभावं धियेप्सति ॥"

इति वार्तिककारः। तस्मादुपपन्नं व्याप्तिग्रहणम् ॥

अत्र केचिदाहुः। त्रिरूपाणि त्रीण्येव लिङ्गानि—अनुपलब्धिः, स्वभाव, कार्यं चेति। परार्थानुमानवाक्यं च हेतूदाहरणावयवद्वयात्मकमिच्छन्ति। तत्र[5] तेषां स्वार्थानुमानं तावदुपन्यस्यते। त्रिरूपाल्लिङ्गादर्थदृक् स्वार्थानुमानम्। तत्रापि प्रथममनुपलब्धिः, यथा—न प्रदेशविशेषे क्वचिद् घट उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति। स्वभावस्योदाहरणं

1 B—दाय वचनम्.
2 *Nai. s.* IV. 22.
3 D—शब्दौ [ब्द] निर्दे.
4 *Nai. s.* IV. 15.
5 D omits तत्र.

यथा - वृक्षोऽयं शिंशपात्वादिति। कार्यस्योदाहरणं यथा— अग्निरत्र धूमादिति। अत्र द्वे वस्तुसद्भावसाधने स्वभावः कार्यं चेति; अनुपलब्धिस्तु प्रतिषेधहेतुः। इति स्वार्थानुमानम्॥

अथ परार्थानुमानम्। त्रिरूपलिङ्गाख्यानं परार्थानुमानं, [1]कारणे कार्योपचारात्। तद् द्विविधं प्रयोगभेदाद्, साधर्म्यवद् वैधर्म्यवच्च। नानयोरर्थतः कश्चिद् भेदः, अन्यत्र प्रयोगभेदात्। तत्र साधर्म्यवत्; यदुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तदसत्; यथा खरस्य विषाणम्। नोपलभ्यते च क्वचिदेव प्रदेशविशेष उपलब्धिलक्षणप्राप्तो घट इत्यनुपलब्धिप्रयोगः। तथा स्वभावहेतोः प्रयोगः—यत्सत् तत् सर्वमनित्यं, यथा घटादि; सच्च विवादास्पदीभूतमिति। तथा यदुत्पत्तिमत् तदनित्यं, यथा घटादि; उत्पत्तिमच्च विवादास्पदीभूतमिति। तथा यत्कृतकं तदनित्यं, यथा घटादि; कृतकं च विवादास्पदीभूतमिति। कार्यहेतोः प्रयोगः; यत्र धूमस्तत्राग्निः, यथा महानसादौ; अस्ति चेह धूम इति। वैधर्म्यवतः प्रयोगः; [2]यत्सदुपलब्धिलक्षणप्राप्तं तदुपलभ्यत इति, [3][प्राप्तं सद् उपलभ्यते तत् सत्] यथा नीलादिविशेषः; न चैवमिहोपलब्धिलक्षणप्राप्तस्य घटस्योपलब्धिरित्येषोऽनुपलब्धिप्रयोगः। नित्ये नास्ति सत्त्वमुत्पत्तिमत्त्वं कृतकत्वं वा। संश्च शब्द उत्पत्तिमान् कृतको वेति वैधर्म्यवतः स्वभावहेतोरेव[4] प्रयोगः। असत्यग्नौ न भवत्येव धूमः। अत्र चास्तीति कार्यहेतोर्वैधर्म्यवतः प्रयोगः॥

---

1 B कारणकार्योपचारात्.

2 A D यत्सदु [यदु]पलब्धिलक्षणप्राप्तं तदुपलभ्य.

3 [प्राप्तं सद् — सत्] additional suggestion in D.

4 B— रेष.

तदेतदसत्। स्वभावादित्रयविलक्षणस्य कृत्तिकोदयस्य रोहिण्युदयलिङ्गत्वदर्शनात्। नहि कृत्तिकोदयो रोहिण्युदयस्य स्वभावः। नापि कार्यं, नाप्यनुपलब्धिः, प्रमाणाभावात्। तथापि कृत्तिकोदयो रोहिण्युदयस्य लिङ्गं दृश्यते। तस्मादेव न त्रीण्येव लिङ्गानीति॥

त्रिरूपाण्येवेति, एतदप्यसत्। पञ्चरूप्यचातूरूप्ययोर्दर्शितत्त्वात्। परार्थानुमानवाक्यस्य द्व्यवयवनियमाभ्युपगमोऽप्यनुपपन्नः, पञ्चावयवत्व[1]दर्शनात्। [2]तस्माद् यद् येन व्याप्तं[3] पञ्चरूपं चतूरूपं वा, तत्तु लिङ्गमिति नियमः; न त्रयं चतुष्टयं वेति[4] परार्थानुमानवाक्यं च पञ्चावयवमिति स्थितम्॥

केचित्पुनर्वेदान्तपक्षेऽपि त्रिरूपमेव लिङ्गं त्र्यवयवं च वाक्यमिच्छन्ति। त्रिरूपत्वे लिङ्गस्य ज्योतिर्ब्राह्मणगतं [5]सुरेश्वरस्य वार्तिकं गमकमाहुः—

[6]"सहोपलम्भसंस्कारात् पुनर्द्वीर्यैकदर्शनात्।
सानुमासम्भवस्तत्र व्यभिचाराय चेन्नहि॥" इति॥

त्र्यवयवं च[7] वाक्यस्य कर्ममीमांसावार्तिककारपरित्यागे कारणाभावादिति। तथा सति असिद्धविरुद्धानैकान्तिकसप्रतिसाधनाश्चत्वार एव हेत्वाभासा। प्रकरणसमस्य सप्रतिसाधनेऽन्तर्भावः। अनध्यवसितस्य चानैकान्तिकेऽन्तर्भावः।

---

1 B प्रदर्शनात्.
D तस्मादन्येन [येन].
2 D प्राप्तं.
3 D omits वेति.
5 B सुरेश्वरवार्तिकम्.
6 *Bṛ. bh. v.* IV. 3. 717.
7 D omits च.

प्रत्य[1]क्षविरुद्धत्वादिः प्रतिज्ञादोषो न हेतुदोषः। ततश्च कालात्ययापदिष्टो नाम हेत्वाभासो नास्ति, कालात्ययापदिष्टस्यानध्यवसितवदनैकान्तिकेऽन्तर्भावात्। किन्तु, षट् प्रतिज्ञाभासाः। प्रत्यक्षविरुद्धः; अनुमानविरुद्धः, शास्त्रविरुद्धः, अर्थापत्तिविरुद्धः, योग्यानुपलब्धिविरुद्धः, अनुभवविरुद्धश्चेति। अत्र च पक्षे केवलान्वयिनोऽन्वयव्यतिरेकिमध्येऽन्तर्भावो विपक्षाभावादेव। विपक्षाद्व्यावृत्तेर्व्यतिरेकसद्भावात्। केवलव्यतिरेकिणो गमकत्वमेव नास्ति, "सहोपलम्भसंस्कारात् पुनर्धीर्यैकदर्शनाद्" इति अनुमानलक्षणविधानात्। कार्थं पुनर्वेदान्तग्रन्थे [2][ष्वापीत ? ष्ववीत] हेतुप्राचुर्यदर्शनम् ? बाह्यतार्किकमुखपिधानार्थं नैयायिकपक्षप्रसिद्धव्यतिरेकहेत्वङ्गीकरणवादेन तदुपन्यासात् तत्प्राचुर्यदर्शनमित्यस्मिन् पक्षे योजयितव्यमित्यलं प्रसङ्गेन। तस्मादनुमानमपि न व्यभिचरति॥

॥ अनुमानलक्षणं समाप्तम् ॥

---

1 D प्रत्यक्षाविरुद्धत्वादि. 2 suggestion in D.

"शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्"[1]। शास्त्रमिति लक्ष्यनिर्देशः, शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमिति लक्षणम्। असन्निकृष्टेऽर्थे प्रमाणान्तरेणानधिगतेऽर्थे शब्दविज्ञाननिमित्तं विज्ञानं शास्त्रम्। असन्निकृष्टग्रहणम् अनुवादविसंवादनिवृत्त्यर्थम्। अग्निर्हिमस्य भेषजमित्यादिशब्दविज्ञानजनिते विज्ञानेऽसंवादोऽस्ति। तथा अङ्गुल्यग्रे हस्तियूथशतं तिष्ठतीति लौकिकशब्दविज्ञानजनिते विज्ञाने स्पष्टमस्ति विसंवादः। तन्निवृत्त्यर्थमसन्निकृष्टग्रहणम्। अर्थग्रहणमर्थासंस्पर्शनिरासार्थम्, अर्थापेक्षितास्वभावनिरासार्थं वा। [2]तथाहि नद्यास्तीरे फलानि सन्तीत्यादिपुरुषवचनाद् उत्पन्नज्ञानमर्थग्राहिस्वभावं सत् नार्थं संस्पृशति तद्वद् वेदजनितं सर्वं विज्ञानमिति यत्संगिरन्ते, तन्निरासार्थमर्थग्रहणम्। अथवा बहिर्गौस्तिष्ठतीत्येवमादिशब्दविज्ञानजनितं विज्ञानमस्तु वा, अर्थो मा वा भूदित्यर्थापेक्षितास्वभावमुपलभ्यते; तद्वत्सर्वमेव वेदजनितं विज्ञानमिति यन्मन्यन्ते तन्निरासार्थमर्थग्रहणम्। निरासप्रकारस्तु पुरुषदोषानुगमान्नदीतीरवाक्यजनितविज्ञानस्य मिथ्यार्थविषयतामात्रं केवलं भवति नार्थासंस्पर्शो ज्ञानानुरूपार्थसद्भावात। अर्थापेक्षितास्वभावप्रतीतिरपि वक्तृदोषाशङ्क्या श्रोतुरपराधाद् भवति, न पुनः शब्दापराधादिति॥

---

1 *S. bh.* under 1.1.5. 2 B D omit तथा हि.

शब्दविज्ञानग्रहणं प्रमाणान्तरे लक्षणव्याप्तिनिरासार्थम् अनिरूपितकारणनिरासार्थं वा। यद्वा शब्दस्य विवक्षालिङ्गत्वनिरासार्थम्। तथा च शाक्यभिक्षवः शब्दस्य विवक्षाकार्यत्वाद् विवक्षालिङ्गम्[1]। शब्दः शब्द इत्येव न कश्चिदर्थं बोधयति। ततश्च न शब्दविज्ञानादर्थविज्ञानं; किं तर्हि ? लिङ्गविज्ञानाल्लिङ्गिविज्ञानं, शब्दलिङ्गकं विवक्षानुमानं भवतीति मन्यन्ते। तत्र चेमं विभागमिच्छन्ति, यत्र प्रत्यक्षेण प्रमाता स्वलक्षणलक्षणं परमार्थसत्यं प्रमेयमुपलभ्य विकल्प्य व्यवहृत्य प्राप्य चार्थमवस्थितः परस्मै विवक्षति वाक्यम्। एतदुक्तं भवति — "कल्पनापोढमभ्रान्तं प्रत्यक्षम्। अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना। तया रहितं तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं विज्ञानं प्रत्यक्षम्"। एषा सुगतसिद्धान्तव्यवस्था। तच्च प्रत्यक्षं परमार्थसत्यं स्वलक्षणमर्थमुपदर्शयति नानुमानवत् संवृत्तिसत्यं सामान्यमावेदयति; ततश्च नित्यं सविकल्पकं कल्पनाज्ञानमुपनयति; ततश्चोदकाद्यर्थमुद्दिश्य पुरुषं प्रवर्तयति; ततश्च उदकादिस्वलक्षणं प्रापयति। स चैतानि प्रमाणफलानि क्रमेणासाद्य व्यवस्थितः परस्मै वाक्यं विवक्षति यत्र क्वचिदिति। तत्र शब्दाख्यकार्येण वक्तृविवक्षाख्यकारणानुमानं पारम्पर्येणार्थोपलब्धिपूर्वकादवस्तुविषयमपि वस्तु प्रतिलम्भयति, यथा सुगतागमेषु। यत्र पुनर्भ्रान्तिपूर्विकैव रचना भवति तत्र विवक्षानुमानेऽपि नार्थलाभो, यथा शैवाद्यागमेषु।

---

1 A विवक्षालिङ्गः शब्दः.

[1]एतदुक्तं भवति—शब्दलिङ्गकमनुमानं सामान्यविषयत्वादुभयत्रावस्तुविषयमप्येकत्र वस्तु प्रापयति नान्यत्रेति। किमेवं सम्भवति। सम्भवत्येव, दृष्टत्वात्। अपि चाहुः—

"मणिप्रदीपप्रभयोर्मणिबुद्ध्याऽभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति"॥ इति।

यद्यप्यत्र विवक्षानुमानमुभयत्रापि प्रत्यक्षवदेव प्रमाणत्वात् सम्यग्ज्ञानं, तथापि अवस्तुविषयत्वाद् वस्तुप्रतिलम्भहेतु-[2]त्वाहेतु?] त्वं मिथ्याज्ञानेना[3]विशिष्टमिति मणिप्रदीपप्रभयोरित्युदाहरणम्। तन्निरासार्थं शब्दविज्ञानग्रहणम्। शब्दविज्ञानमित्येतदेवार्थविज्ञानस्य प्रयोजकं, न लिङ्गत्वादिरूपान्तरमिति ज्ञापनार्थं शब्दविज्ञानग्रहणमित्यर्थः। कथं पुनः शब्दस्य विवक्षालिङ्गत्वनिराकरणं? विवक्षाकार्यत्वे प्रमाणाभावात्, नित्यत्वे च प्रत्यभिज्ञानप्रमाणसद्भावात्, वर्णात्मकस्य तावद्भेदे च वक्तुरभावाद् विवक्षाकार्यत्वासिद्धेर्वाक्यस्य। लौकिकवाख्यानां यद्यपि विवक्षाकार्यत्वेन विवक्षालिङ्गत्वमस्ति तथापि श्रोतुरनधिगतार्थपरिच्छित्तिमुखेनैव विवक्षालिङ्गत्वमिति तस्य स्वार्थप्रामाण्यविघातकत्वासम्भवात्। पदमात्रस्य च वाक्यभावमनापन्नस्य प्रयोगसमवायित्वासम्भवाल्लोकेऽपि तस्य विवक्षाकार्यत्वासम्भवात्। सर्वप्रकारस्यापि वर्णात्मकपदात्मकस्य शब्दजातस्य सुगताभिप्रेतकेवलविवक्षालिङ्गत्वं नास्तीति विवक्षानुमानत्वनिराकरणप्रकारः॥

1 B D तदुक्तं. 2 A हेतुत्वाहेतुत्वमिथ्या,
3 D नापि विशिष्टं.

शास्त्रं द्विविधम्। अप्रणेतृकमाप्तप्रणेतृकं च। तत्राप्रणेतृकं स्वार्थप्रवृत्तप्रमाणान्तरनिरपेक्षम्। यथा – "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति। आप्तप्रणेतृकं स्वार्थप्रवृत्तप्रमाणान्तरसापेक्षम्। यथा "अष्टका कर्तव्ये"ति। प्रमाणान्तरापेक्षणं चास्य प्रामाण्यस्थापनाय। प्रामाण्यस्थापनम् अप्रामाण्यहेतुनिराकरणार्थम्। प्रमाणान्तरापेक्षणं न साक्षात् प्रामाण्यसिद्ध्यर्थमित्यर्थः। तथा चोक्तं — "प्रामाण्यस्थापनं तु स्याद्वक्तृश्रोत्रोर्धीहेतुसम्भवाद्" इति। तत्पुनः द्विविधं, विधिः समन्वयश्चेति। तत्रेष्टाभ्युपायताज्ञानं विधिः, यथा "ज्योतिष्टोमेन स्वर्गकामो यजेते"ति। भेदसंसर्गादिविलक्षणार्थविषयं ज्ञानं समन्वयः। यथा—[1]"तत्त्वमसि", [2]"अहं ब्रह्मास्मि" इति॥

केचित्पुनरप्रणेतृकमेव शास्त्रमिच्छन्ति, न पुनराप्तप्रणेतृकं, पौरुषेयस्य वचनजातस्य बाह्यार्थप्रत्ययहेतुत्वे तदहेतुत्वे च बाह्यार्थप्रामाण्यासम्भवाद् वक्तृज्ञानलिङ्गत्वमा[त्रोपक्ष?त्रापेक्ष]यात्। बाह्यार्थधीहेतुत्वपक्षे तावद् वक्तृज्ञानसिद्धार्थानुवादकत्वात् तदहेतुत्वेऽर्थविषयबुद्धेरेवानुत्पादकत्वात् सुतरामेव न बाह्यार्थव्याप्तो वा। आहुरपि च — "पौरुषेयाद् वचनाद् एवमयं पुरुषो वेदेति भवति प्रत्ययो, नैवमर्थ" इति भाष्यमपि अस्माकमनुगुणमिति। तदसत्, श्रोतुरनधिगतार्थगन्तृत्वे वाक्यस्यानुवादकत्वासम्भवाद्, बाह्यार्थबुद्ध्युत्पत्तेः स्वसाक्षिसंवेद्यत्वादनुत्पत्तेरसम्भवाद्, अर्थविषयबुद्ध्यनुत्पत्तौ च

---

1 *Chā.U.* IV.8.7. 2 *Br.U.* I.4.10.

तद्विषयवक्तृज्ञानानुमानस्य निर्बीजत्वात्। यदप्याहुः—"विधिसमन्वयभेदो नास्तीति सर्वस्य विधित्वादि"ति, तदप्यसत्। समन्वयादपि फलवन्निश्चितबुद्ध्युत्पत्तिदर्शनाद् विधिवत् समन्वयस्यापि प्रमाणत्वात्। तस्मादुपपन्नं शास्त्रस्य द्वैविध्यम्। अतो न शास्त्रमपि व्यभिचरति॥

॥ शास्त्रलक्षणं समाप्तम्॥

उपमानम्

सदृशदर्शनाद् असन्निकृष्टेऽर्थे ज्ञानमुपमानम्। यथा गोसदृशगवयदर्शनात् गवयसदृशो गौरिति ज्ञानम्। तदनुमानमेवेति चेन्न, व्यधिकरणत्वात। तथा हि— गवयसदृशो गौर्गवयस्य [1]गोसादृश्यत्वादिति नित्यः शब्दः पटस्य कृतकत्वादितिवद् व्यधिकरणो हेतुः। तर्हि स्मृतिरेवैषा नोपमानमिति चेद्, अथापि स्याद् यदायं पुरुषो नगरगः सन्नधिगतगुः, तदैवायमासीदर्थेन्द्रियसम्प्रयोगाद् अधिगत-गोसादृश्यः। ततश्च कुतश्चिन्निमित्तादरण्यमनुप्राप्तः गवयं पश्यन् समुद्बुद्धसंस्कारो गोगतसादृश्यमनुस्मरन् प्रत्येति गवयसदृशो गौरिति[2]।

---

1 A सादृश्यात्.

2 After गौरिति all the manuscripts continue with योग्यानुपलब्धि etc. The *Arthāpatti* portion must occur in this context. But unfortunately we do not get that portion in these manuscripts.

The mention of *Arthāpatti* in *Śabarabhāṣya* in the context is as follows:— "अर्थापत्तिरपि—दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना। यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्या-दृष्टस्य कल्पना"। under *Autpattikasūtra*.1-1-5.

योग्यानुपलब्धिनिमित्तकमर्थाभावज्ञानमभाव इति। योग्यानुपलब्धिस्तु साक्षिसंवेद्या। ततश्च साक्षिचैतन्यव्याप्ता सत्यनुपलब्धिरभावज्ञाननिमित्तमिति न तत्र काचिदनवस्था, नैव स्वभाव्यकार्यसामर्थ्यसामर्थ्यासम्भवादिपर्यनुयोगावकाशः। येषां तु प्रमाणप्रमितरूपेण भावरूपतामापद्यमानः प्रमाणाभावः प्रमेयाभावज्ञानहेतुरिष्टः तेषामनवस्था। प्रमाणात् प्रमाणाभावस्यापि प्रमीयमाणतया प्रमाणाभावज्ञानहेतुत्वप्रसङ्गात्। अथ प्रमाणाभावस्य प्रमीयमाणत्वं प्रमेयाभावज्ञानोत्पत्तावनुगतं, स तर्हि कथम् असन्, अविद्यमानोऽभावः कार्यं करिष्यति? न ह्यभावात् भावोत्पत्तिः। अथापि स्यादकारणादपि प्रत्यवायः स्यात्, नान्यकारणात्। न चैतदिष्टम्। यत आह —

"स्वकाले यदकुर्वन् हि करोत्यन्यं नचेतनः।
[1]प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते॥" इति

प्रमाणानुदयस्य साक्षिवेद्यत्वे न कश्चिद्दोष इति तदभ्युपगन्तव्यम्। तस्मात् प्रमाणाभावात् प्रमेयाभावनिश्चयः। तदेवमेतानि षट् प्रमाणानि जैमिनेः॥

अत्र केचिद् अभावाख्यं प्रमाणं नेच्छन्ति, प्रमेयाभावात्। तथाहि नास्तीति प्रमीयत इत्यर्थाभावः। ततश्च इह भूतले घटो नास्तीति, भूतले घटो न प्रतीयत इत्युक्तं

---

